श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीहयग्रीवपञ्जरम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवपञ्जरम् ॥

अथ कल्पं प्रवक्ष्यामि हयग्रीवस्य पञ्जरम्।
यस्य विज्ञानमात्रेण वाणी गङ्गेव निस्सरेत्॥ १ ॥

शुद्धस्फटिकसङ्काशं तुषाराचलसन्निभम्।
श्वेतपर्वतसङ्काश चन्द्रमण्डल मध्यगम्॥ २ ॥

चतुर्भुजमुदाराङ्गं पुण्डरीकायतेक्षणम्।
शङ्खचक्रधरं देवं किरीटमकुटोज्ज्वलम्॥ ३ ॥

कौस्तुभोद्भासितोरस्कं वनमालाविराजितम्।
पीताम्बरधरं देवं श्रीवत्साङ्कितवक्षसम्॥ ४ ॥

मुख्यहस्तद्वयेनैव ज्ञानमुद्राक्षपुस्तकम्।
धारयन्तं हयग्रीवं ध्यायेदिष्टार्थसिद्धये॥ ५ ॥

ओंकारोद्गीथरूपाय ऋग्यजुस्साममूर्तये।
नमोऽस्तु देवदेवाय वाञ्छितार्थप्रदायिने॥ ६ ॥

अज्ञानतिमिरं छिन्धि ज्ञानं चाशु प्रयच्छ मे।
देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते॥ ७ ॥

भूतप्रेतपिशाचादीन् छिन्धि देव जनार्दन।
ज्वरादीन् निखिलान् रोगान् नाशयाऽऽशु रमापते॥ ८ ॥

दारिद्र्यं सकलं छिन्धि कुरु सौभाग्यभाजनम्।
शत्रून्नाशय मे देव हयशीर्ष नमोऽस्तु ते॥ ९ ॥

मेधां प्रज्ञां बलं विद्यां संपदं पुत्रपौत्रकम्।
देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते॥ १० ॥

कार्कोटकमुखान् सर्पान् विषादीन् विलयं नय।
अमृतं कुरु मे देव हयशीर्ष नमोऽस्तुते॥ ११ ॥

स्त्रीवश्यं जनवश्यं च राजवश्यं परात्परम्।
कुरु देवाङ्गनाबृन्दसेव्यमानपदाम्बुज॥ १२ ॥

हंसाय परमेशाय चन्द्रमण्डलवासिने।
नमो हयोत्तमाङ्गाय वाञ्छितार्थप्रदायिने॥ १३ ॥

ऋग्यजुस्सामरूपाय ऋताय महते नमः।
ऋक्षेशबिन्दुमध्यस्थराजीवासनभाजिने॥ १४ ॥

वेदवेदान्तवेद्याय वेदाहरणकर्मणे।
सत्त्वासत्त्वमहामोहभेदिने ब्रह्मणे नमः॥ १५ ॥

प्रज्ञानदायिने नित्यं भजतां भावितात्मनाम्।
प्रणवोद्गीथवपुषे प्रणतिं प्रतिपादये॥ १६ ॥

मन्दारकुन्दस्फटिकमहनीयोरुवर्चसे।
मनीषाप्रददेवाय महाश्वशिरसे नमः॥ १७ ॥

इति द्वादशमन्त्रेण नमस्कुर्याज्जनार्दनम्।
प्रातः प्रसन्नवदनं पूर्वाचार्याभिवन्दितम्॥ १८ ॥

॥ इति श्रीहयग्रीवपञ्जरं सम्पूर्णम्॥